श्री वाराही देवि कवचं

अस्यश्री वाराही कवचस्य त्रिलोचन ऋषीः अनुष्टुप् छंदः श्री वाराही देवता
ॐ बीजं ग्लौं शक्तिः स्वाहेति कीलकं मम सर्वशत्रुनाशनार्थे जपे विनियोगः
ध्यानम्

ध्यात्वेंद्र नीलवर्णाभां चंद्रसूर्याग्नि लोचनां
विधिविष्णु हरेंद्रादिमातृभैरवसेविताम् II 1

ज्वलन्मणिगणप्रोक्त मकुटामाविलंबितां
अस्त्रशस्त्राणि सर्वाणि तत्तत्कार्योचितानि च II 2

एतैस्समस्तैर्विविधं बिभ्रतीं मुसलं हलं
पात्वा हिंस्रान् हि कवचं भुक्तिमुक्ति फलप्रदम् II 3

पठेत्रि संध्यं रक्षार्थं घोरशत्रुनिवृत्तिदं
वार्ताळी मे शिरः पातु घोराही फालमुत्तमम् II 4

नेत्रे वराहवदना पातु कर्णौ तथांजनी
घ्राणं मे रुंधिनी पातु मुखं मे पातु जंधिनीII 5

पातु मे मोहिनी जिह्वां स्तंभिनी कंथमादरात्
स्कंधौ मे पंचमी पातु भुजौ महिषवाहना II 6

सिंहारूढा करौ पातु कुचौ कृष्णमृगांचिता
नाभिं च शंखिनी पातु पृष्ठदेशे तु चक्रिणि II 7

खड्गं पातु च कट्यां मे मेढ्रं पातु च खेदिनी
गुदं मे क्रोधिनी पातु जघनं स्तंभिनी तथा II 8

चंडोच्चंड श्चोरुयुगं जानुनी शत्रुमर्दिनी
जंघाद्वयं भद्रकाळी महाकाळी च गुल्फयो II 9

पादाद्यंगुळिपर्यंतं पातु चोन्मत्तभैरवी
सर्वांगं मे सदा पातु कालसंकर्षणी तथा। II 10

युक्तायुक्ता स्थितं नित्यं सर्वपापात्प्रमुच्यते
सर्वे समर्थ्य संयुक्तं भक्तरक्षणतत्परम्। II 11

समस्तदेवता सर्वं सव्यं विष्णोः पुरार्धने
सर्शशत्रुविनाशाय शूलिना निर्मितं पुरा। II 12

सर्वभक्तजनाश्रित्य सर्वविद्वेष संहतिः
वाराही कवचं नित्यं त्रिसंध्यं यः पठेन्नरः। II 13

तथाविधं भूतगणा न स्पृशंति कदाचन
आपदश्शत्रुचोरादि ग्रहदोषाश्च संभवाः। II 14

मातापुत्रं यथा वत्सं धेनुः पक्ष्मेव लोचनं
तथांगमेव वाराही रक्षा रक्षाति सर्वदा। II 15